05-09-2020

अनिवार्यपत्रम् । शास्त्री II

व्याकरणधात्रेभ्यः । रघुवंशम् । श्लोकव्याख्या ।

"प्रमुदितवरपक्षमेकतस्तत्क्षितिपतिमण्डलमन्यतो वितानम् ।
उषसि सर इव प्रफुल्लपद्मं कुमुदवनप्रतिपन्ननिद्रमासीत् ॥"

सन्दर्भः → पूर्ववत् ।

प्रसङ्गः → कविरत्र राजवरपक्षयोः यथाक्रमौदासीन्यप्रसन्नावस्थां वर्णयति ।

अन्वयः → एकतः प्रमुदितवरपक्षम् अन्यतः वितानं तत्क्षितिपति-मण्डलम् उषसि प्रफुल्लपद्मं कुमुदवनप्रतिपन्ननिद्रं सर इव आसीत् ।

शब्दार्थः व्याकरणञ्च → एकतः = एकत्र । प्रमुदितवरपक्षम् → प्रकर्षेण मुदितः वरस्य पक्षः यस्य तत् = प्रसन्नाजसमूहम् । अन्यतः = अन्यत्र । वितानम् = अप्रसन्नम् । तत्क्षितिपतिमण्डलम् → ते ते क्षितिपतयः, तेषां मण्डलञ्च = राजसमूहम् । उषसि = प्रातःकाले । प्रफुल्लपद्मं = पुष्पितकमलम् । कुमुदवनप्रतिपन्ननिद्रम् → कुमुदानां वनं, तेन प्रतिपन्ना निद्रा यस्य तत् = निद्राप्राप्तं नलिनीसमूहम् अथवा नलिनीनिमीलनम् । सरः = तडागः । इव = यथा । आसीत् = अभूत् (अभवत्) ।

तात्पर्यः → स्वयम्वरे अजकण्ठे माल्यार्पणादनन्तरं वरपक्षः प्रमुदितः, राजपक्षः अप्रसन्नः, प्रभाते प्रफुल्लकमलम् इव अपुष्पितनलिनीवनयुक्तसरोवर इव च बभूव ।

विशेषः → शृङ्गाररसः, वैदर्भमार्गः, प्रसादगुणः, उपमालङ्कारः, पुष्पिताग्रावृतञ्च ।

[signature] 05-09-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्यः) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

05-09-2020

संस्कृतसामान्यम् । उपशास्त्री-I

अनिवार्यपत्रम् । संस्कृतानुवाद: ।

1. काशी एक तीर्थस्थान है → काशी एकं तीर्थस्थानमस्ति ।
2. भारत में यह विद्या का प्रसिद्ध केन्द्र है → भारते इयं विद्यायाः प्रसिद्धं केन्द्रमस्ति ।
3. यह सुनकर मैं वहाँ पढ़ने गया → इत्थं श्रुत्वा अहं तत्र (संस्कृतं) पठनाय (पठितुम्) गतः ।
4. क्या आप कल घर जाना चाहते हैं ? → किं भवान् श्वः गृहं गन्तुमिच्छति ?
5. परिश्रम के बिना किसी को सफलता नहीं मिलती है → परिश्रमेण विना न कोऽपि सफलतां प्राप्नोति । परिश्रमेण विना सफलता न मिलति कमपि ।
6. आलस्य छोड़कर कार्य करो → आलस्यं त्यक्त्वा / विहाय कार्यं कुरु ।
7. जीवन में तुम अवश्य सफल होगे → जीवने त्वमवश्यमेव सफलं भविष्यसि ।
8. कर्म से ही मनुष्य सफल और महान् होता है → कर्मणा मनुष्यः / जनः सफलः महान् च भवति ।
9. चाणक्य अर्थशास्त्र का विद्वान् था → चाणक्यः अर्थशास्त्रस्य विद्वान् आसीत् ।
10. चाणक्य का ही दूसरा नाम कौटिल्य था → चाणक्यस्य अपरं नाम कौटिल्यः आसीत् ।
11. उसने मगध साम्राज्य का विनाश कर मौर्य वंश की स्थापना की → सः मगधसाम्राज्यं विनष्ट्य मौर्यवंशस्य स्थापनां अकरोत् ।
12. मौर्यवंश का प्रथम शासक चन्द्रगुप्त था → मौर्यवंशस्य प्रथमः शासकः चन्द्रगुप्तः आसीत् ।

05-09-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

संस्कृतसामान्यम् ।

अनिवार्यपत्रम् ।

05-09-2020

उपशास्त्री - II

निबन्धः ।

अस्माकं प्रधानाचार्यः ।

## शिक्षकदिवसः / मम प्रिय शिक्षकः / अस्माकं प्रधानाध्यापकः ।

अद्य सितम्बर मासस्य पञ्च दिवसः । एष दिवसः भारतवर्षस्य भूतपूर्वराष्ट्रपतेः सर्वपल्ली राधाकृष्णन् महोदयस्य जन्मदिवसः । तस्य जन्मोपलक्ष्ये एष दिवसः शिक्षकदिवसरूपत्वेन मन्यते । स महानुभावः शिक्षककल्याणाय सततं प्रयत्नमकरोत् । डॉ० सर्वपल्ली राधाकृष्णन् महोदयः महान् देशभक्तः, विद्वान् दार्शनिकश्चास्ति ।

शिक्षकः देशस्य, समाजस्य च शिल्पकारः भवति । यः विना केनचित् मोहेन समाजनिर्माणं करोति । शिक्षकः न केवलं छात्रेभ्यः ज्ञानं प्रददाति अपितु तस्य चरित्र-निर्माणं अपि करोति । तान् देशहिताय प्रेरयति । सत्यभाषणं सत्याचरणञ्च कर्तुं उन्मुखी करोति शिक्षकः ।

एतादृशः अस्ति अस्माकं प्रधानाचार्यो डॉ० विजय कुमार मिश्र महाभागाः । सः अस्माकं कृते अनुकरणीयः । स हि छात्राणां प्रियोऽस्ति । स छात्रान् पुत्रीयति । अस्माकं प्रधानाचार्यः साहित्यविषयस्य पूर्णज्ञाता । अन्येषु विषयेषु अपि तस्य गतिः अस्ति । "सत्यं शिवं सुन्दरम्" तस्य जीवनादर्शवाक्यम् । अस्माकं प्रधानाचार्यस्य जीवनादर्शः छात्राणामन्येषामध्यापकानाञ्चानुकरणीयः अस्ति । मधुरभाषी डॉ० विजय कुमार मिश्र महानुभावाः सहयोगीवर्गे अपि स्निह्ययति । शरीरेण कृशकायः किन्तु स्वस्थः, अनुशासनपालने कठोरः, किन्तु हृदयेन कोमलः, विचारेण पवित्रः, ज्ञानेन परिपुष्टः प्रधानाचार्य महोदयाः अस्माकं छात्राणां प्रियशिक्षकः, मार्गदर्शकः अभिभावकश्चास्ति ।

(हस्ताक्षर)

डॉ० निर्मल कुमार झा (स० प्राचार्यः) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।